अनुक्रमांकः ...................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-503**

# पतञ्जलिविश्वविद्यालयः

## परीक्षा – दिसम्बरमासः – 2018
## बी. ए. व्याकरणम् (सत्रम् : पंचमम्)
## संस्कृतम्
## तृतीयपत्रम्-संस्कृतसाहित्यम्

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम् :** प्रश्नपत्रमिदं 'क, ख, ग' इति खण्डत्रये विभक्तमस्ति। प्रतिखण्डम् अङ्कनिर्धारणं तत्रैव द्रष्टुं शक्यते। प्रतिखण्डं प्रदत्तानां निर्देशानामनु-सरणपुरस्सरमेव प्रश्नानामुत्तराणि लेखनीयानि 'सर्वे प्रश्ना अनिवार्याः'।

### (खण्ड – "क" गद्यम्) 25 अङ्काः

**प्रश्नः1– अलङ्काररसव्याकरणादिटिप्पणीनिर्देशपूर्वकम् –**
**अधोलिखितेषु गद्येषु केषाञ्चन त्रयाणां व्याख्या विधेया –** **(7X3=21)**

(क) सोऽश्रुगद्गदमवदत् – श्रूयतां महाभाग! विदर्भो नाम जनपदः, तस्मिन् भोजनराजवंशभूषणम्, अंशावतार इव धर्मस्य, अतिसत्त्वः, सत्यवादी, वदान्यः, विनीतः, विनेता प्रजानाम्, रञ्जितभृत्यः, कीर्तिमान्, उदग्रः, बुद्धिमूर्तिभ्यामुत्थानशीलः, शास्त्र-प्रामाणकः, शक्यभव्यकल्पारम्भी, संभावयिता बुधान्, प्रभावयिता सेवकान्, उद्भावयिता बन्धून्, न्यग्भावयिता शत्रून्, असम्बद्धप्रलापेष्वदत्तकर्णः अतिनदीष्णः कलासु, मनुमार्गेण प्रणेता चातुर्वर्ण्यस्य, पण्यश्लोकः पुण्यवर्मा नामासीत्।

(ख) अतिक्रान्तशासनाश्च प्रजा यत्किञ्चवादिन्यो यथा-कथञ्चिद्वर्तिन्यः सर्वाः स्थितीः संकिरेयुः। निमर्यादश्च लोको लोकादितोऽमुतश्च स्वामिनमात्मानञ्च भ्रंशयते। आगमदीपदृष्टेन खल्वध्वना सुखेन वर्तते लोकयात्रा। दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सु व्यवहितविप्र-कृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन हीनः सतोरप्यायतविशाललोचनयोरन्ध एव जन्तु-रर्थदर्शनेष्वसामर्थ्यात्।

(ग) देव! दैवानुग्रहेण यदि कश्चिद् भाजनं भवति भवति विभूतेः तमकस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्त्ताः। तथापि केचित् प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य, मुण्डयित्वा शिरः, बद्ध्वा दर्भज्जुभिः, अजिनेनाच्छाद्य, नवनीतेनो-पलिप्य, अनशनं च शयित्वा सर्वस्वं स्वीकरिष्यन्ति।

(घ) द्वितीयेऽन्योन्यं विवदमानानां प्रजानामाक्रोद् दह्यमानकर्णः कष्टं जीवति। तत्रापि प्राड्विवाकादयः स्वेच्छया जयपराजयौ विदधाना पापनापकीर्त्या च भर्तारमात्मनश्चार्थैर्योज-यन्ति। तृतीये स्नातुं भोक्तुं च न लभते। भुक्तस्य चान्धःपरिणामस्तावदस्य विषभयं न शाम्यत्येव। चतुर्थे हिरण्यप्रतिग्रहाय हस्तं प्रसारयन्नेवोत्तिष्ठति।

(ङ) अथैवं मन्त्रिणो मनस्यभूत् – अहो मे मोहाद्बालि-श्यम्। अरुचितेऽर्थे चोदयन्नर्थीवाक्षिगतोऽहमस्य हास्यो जातः। स्पष्टमस्य चेष्टानामयथापूर्व्यम्। तथाहि न मां स्निग्धं पश्यति, न स्मितपूर्वं भाषते न रहस्यानि नोरसवेष्वनुगृह्णाति, न विलोभनवस्तूनि प्रेषयति, न मत्सुकृतानि प्रगणयति, न मे गृहवार्तां पृच्छति, न मामन्तःपुरं प्रवेशयति।

**प्रश्नः2– विश्रुतचरितस्य गद्यसौन्दर्यं प्रतिपादयत ।** **(4X1=04)**

***अथवा***

**विश्रुतचरितस्य कथासारं लिखत ।**

## (खण्ड – "ख") 20 अङ्काः

## (नाटकम्)

**प्रश्नः3– अधोलिखितेषु केषाञ्चन त्रयाणां श्लोकानां छन्दोऽलङ्काररसव्याकरणादिटिप्पणीनिर्देशपूर्वकं सप्रसंगं व्याख्या कार्या –** (5X3=15)

(क) भ्रमति नभसि विद्युच्चण्डवातानुविद्धै –
नर्वजलदनिनादैर्मेदिनी सप्रकम्पा।
इह तु जगति नूनं रक्षणार्थं प्रजाना –
मसुरसमितिहन्ता विष्णुरद्यावतीर्णः।।

(ख) शार्ङ्गोऽस्मि विष्णुकरलग्नसुवृत्तमध्या
स्त्रीविग्रहात् पुरुषवीर्यबलातिदर्पा।
यस्यार्थमाहवमुखेषु मयारिसङ्घाः
प्रभ्रष्टनागररथवाजिनराः प्रभग्नाः।।

(ग) सौवर्णकान्ततरकन्दरकूटकुञ्ज
मेरु न कम्पयति वायसपक्षवातः।
हास्योऽसि भोः समकरक्षुभितोर्मिमालं
पातुं य इच्छसि कराञ्जलिना समुद्रम्।।

(घ) गिरितटकठिनांसावेव बाहू ममेतौ
प्रहरणमपरं तु त्वादृशां दुर्बलानाम्।
अथ मम भुजदण्डैः पीड्यमानश्च शीघ्रं
यदि न पतसि भूमौ नास्मि दामोदरोऽहम्।।

(ङ) विषदहनशिखाभिर्यन्मुखात् प्रोद्गताभिः
कपिशितमशिवाभिश्चक्रवालं दिशानाम्।
सरभसमभियान्तं कृष्णमालक्ष्य शङ्की
नमयति शिरसान्तर्मण्डलं चण्डनागः।।

**प्रश्नः4– बालचरितनाटकानुसारं कंसस्य चरित्रचित्रणं कुरुत।** (5X1=05)

***अथवा***

**बालचरितनाटकस्य तृतीयाङ्कस्य सारं लिखत।**

## (खण्ड – "ग") 25 अङ्काः

## (काव्यशास्त्रम्)

**प्रश्नः5– अधोलिखितष्वलङ्कारेषु केषाञ्चन चतुर्णां सङ्गतिनिर्देशपूर्वकं लक्षणोदाहरणानि लिखत –** (5X4=20)

| | | |
|---|---|---|
| अनुप्रासः। | स्वभावोक्तिः। | श्लेषः। |
| उत्प्रेक्षा, | विभावना, | अर्थान्तरन्यासः। |

**प्रश्नः6– रीतिस्वरूपं सभेदोदाहरणं लिखत –** (05)

***अथवा***

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम्।।

**इत्यत्र को नामालङ्कार इति विवेचयत।**

--------------x--------------